# शिक्षा–निदेशालयः राष्ट्रिय–राजधानी–क्षेत्रम्, देहली–सर्वकारः

## मध्यावधिः–अभ्यासप्रश्नपत्रम्– 2026-27

## कक्षा- दशमी संस्कृतम् (कोड-122)

**अवधिः– होरात्रयम्** **सम्पूर्णाङ्काः – 80**

**सामान्यनिर्देशाः-**

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्-**

| | | |
|---|---|---|
| खण्डः- क | अपठितांश – अवबोधनम् | 10 अङ्काः |
| खण्डः- ख | रचनात्मककार्यम् | 15 अङ्काः |
| खण्डः- ग | अनुप्रयुक्तव्याकरणम् | 25 अङ्काः |
| खण्डः- घ | पठित-अवबोधनम् | 30 अङ्काः |

**खण्डः- क**

**अपठितांश – अवबोधनम् 10 अङ्काः**

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 10**

भारते गुरोः स्थानं अतिशयेन उन्नतम् अस्ति। "गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः, गुरुः साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः" इति श्लोकः अस्मान् दर्शयति यत् गुरुं प्रति श्रद्धा एव ज्ञानस्य द्वारम् उद्घाटयति। गुरु एव शिष्यं अज्ञानान्धकारात् ज्ञानप्रकाशं प्रति नयति। प्राचीनकाले विद्यार्थी गुरुकुले निवसन्ति स्म, यत्र ते केवलं शास्त्राध्ययनं न कुर्वन्ति, अपि तु स्वसंयमं, सेवा-भावं, विनयं च अधिगच्छन्ति स्म। तत्र गुरुः शिष्यानाम् आचार्यः, पालकः, मित्रं च आसीत्।

अद्यतनकाले अपि गुरोः महत्वं न घटितम्। यद्यपि विद्याभ्यासस्य साधनानि परिवर्तितानि, तथापि गुरोः मार्गदर्शनम् आवश्यकं भवति। गुरुः एव शिष्येभ्यः सदाचारस्य मार्गं दर्शयति, तेषां मनः नियम्यति च। यः शिष्यः स्वगुरोः आज्ञां पालयति, तं नम्रतया उपसर्पति, स एव जीवनमार्गे सफलः भवति। अतः सर्वे विद्यार्थिनः सदैव स्मरन्तु—गुरोः कृपया एव जीवनम् उज्ज्वलं भवति।

**अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 2x1=2**

i.) भारतदेशे कस्य स्थानम् अतिशयेन उन्नतम् अस्ति?

DoE, Delhi

ii.) प्राचीनकाले विद्यार्थी कुत्र निवसन्ति स्म?

iii.) यः शिष्यः स्वगुरोः आज्ञां पालयति, सः कथं भवति?

**ब) पूर्णवाक्येन लिखत (केवलं प्रश्नद्वयम्)** **2x2=4**

i.) अनुच्छेदे गुरुं विषये कः श्लोकः उद्धृतः अस्ति?

ii.) प्राचीनकाले विद्यार्थी गुरुकुले किम् अधिगच्छन्ति स्म?

iii.) शिष्यः जीवनमार्गे कदा सफलः भवति?

**इ.) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।** **1**

**ई.) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्)** **3x1=3**

**(i)** 'सर्वे विद्यार्थिनः सदैव स्मरन्तु' अत्र किं कर्तृपदम्?

(क) विद्यार्थिनः (ख) स्मरन्तु (ग) सदैव

**(ii)** 'सर्वे विद्यार्थिनः' अनयोः विशेषणपदं किम् ?

(क) सर्वे (ख) विद्यार्थिनः (ग) किमपि न

**(iii)** 'शिक्षकः' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क) आचार्यः (ख) अध्यापकः (ग)गुरुः

**(iv)**'सर्वे विद्यार्थिनः सदैव स्मरन्तु' अस्मिन् वाक्ये किम् अव्ययपदं प्रयुक्तम्?

(क) विद्यार्थिनः (ख) स्मरन्तु (ग) सदैव

**खण्डः ख - रचनात्मक–कार्यम्** **15 अङ्काः**

**2.** अ भवान् समाजसेवी राहुलः शाहदराजनपदे निवसति। भवतां क्षेत्रे सर्वत्र जलभरणम् अभवत्। नगरपालिकायै जलभरस्य समस्यायाः समाधानार्थं मञ्जूषायां प्रदत्तानां पदानां सहायतया एकं औपचारिकं पत्रम् उत्तरपुस्तिकायां लिखतु।
**5**

**मञ्जूषा**

| |
|---|
| पीडिताः, वर्षाकाले, जलप्लावनात्, डेंगू–मलेरियादि ज्वरेण, जनाः, नगर–निगमं, रक्षन्तु, मशकाः, निवेदनं, सर्वत्र, विषाक्तं, वायुमण्डलं, शीघ्रं, नालिकानां, शुद्धिः, मार्गाणां, कार्यं, निवासिनां, निरीक्षणम् |

अथवा

आ भवान् अर्जुनः अस्ति। भवतः भ्राता अङ्कितः अस्मिन् वर्षे दशमीं कक्षाम् उत्तीर्णं करिष्यति। भ्रात्रे अङ्किते भविष्यविषये मार्गदर्शनाय मञ्जूषायां प्रदत्तानां पदानां सहायतया एकं अनौपचारिकं पत्रम् लिखतु –

**मञ्जूषा**

| |
|---|
| प्रेषकः, अर्जुनः, बोर्डपरीक्षा, सम्प्नवान्, जिज्ञासा, अगामिकक्षायां, विषयः, विज्ञानं, वाणिज्यं, गणितं, संगणकं, मार्गदर्शनं, भविष्याय श्रेष्ठं, प्रतीक्षे, भ्रातः! |

**3.प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत– 5x1=5**




**मञ्जूषा**

| |
|---|
| अध्यापिका, छात्राः, चित्रम्, सुरक्षायाः, कारणं, नियमपालनं, सर्वे जनाः , सम्मर्ददीपः, हरितरक्तपीतवर्णैः, प्रकाशितः, पुलिसकर्मी, दृश्यं, जनाः, वाहनानि, मार्गदृश्यं, दृश्यते, क्रमशः, पथं, यथानियमं, सुव्यवस्थितानि |

अथवा

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत –**

**"देशस्य नेतारः"**

**मञ्जूषा-**

| |
|---|
| रक्षकाः, नीतिं, देशरक्षायै, कुर्वन्ति, संसदि, चिन्तनं, विदेशनीतिः, विदेशे, निर्मान्ति, जनाः, वसन्ति, सुखेन, परिवाराः, सुरक्षिताः, भवन्ति, अधिकारिणः, सहयोगं, आदिशन्ति, परिपालयन्ति, आत्मनिर्भरः, स्वालम्बनम् |

DoE

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत -** **5x1=5**

**i.)** मैं प्रतिदिन प्रातःकाल विद्यालय जाता हूँ। I go to school every morning.

**ii.)** सूरज पूर्व दिशा में उदय होता है। The sun rises in the east.

**iii.)** माता हमें प्रेम से शिक्षा देती है। Mother teaches us with love.

**iv.)** विद्यार्थी पुस्तकालय में पुस्तकें पढ़ते है। The students read books in the library.

**v.)** गंगा नदी हिमालय से निकलती है। The River Ganga originates from the Himalayas.

**'ग'-खण्डः**

**अनुप्रयुक्त-व्याकरणम्**

**5.** अ **अधोलिखितेषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा लिखत** **4x1=4**

I. **नास्ति+ उद्यमसमो** बन्धुः कृत्वा यं नावसीदति।

II. सकलैः विद्यार्थिभिः समयस्य **सदुपयोगः** करणीयः।

III. **व्याघ्रोऽपि** सहसा नष्टः गलबद्धश्रृगालकः।

IV. **काचित्+इयमिति** मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

अथवा

आ **अधोलिखितेषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा लिखत**

I. **इति+ उक्त्वा** धाविता तूर्णं व्याघ्रमारी भयङ्करा।

II. राजासनं **खल्वेतत्**

III. **आर्योऽपि** गुरुचरणवन्दनायाम्।

IV. न **कश्चिदस्मिन्** तपोवने तस्य नाम व्यवहरति।

**6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत-** **4x1=4**

(i) पाषाणीसभ्यतायां **लतातरुगुल्माः** पिष्टाः भवन्ति।

(क) लताश्च तरवश्च गुल्माश्च (ख) लतातरुगुल्म यस्य ते (ग) लतां च ते तरुगुल्माः (घ) लतानां तरुगुल्माः

(ii) कुत्सितवस्तुमिश्रितं भक्ष्यं **समलं** धरातलम्

(क) मलाद् युक्तम् (ख) मलेन सहितम् (ग) मलं युक्तम् (घ) मलाय युक्तम्

(iii) बलीवर्दाभ्यां **क्षेत्रकर्षणं** कुर्वन्नासीत्।

(क) क्षेत्रस्य कर्षणस्य (ख) क्षेत्रस्य कर्षणं (ग) क्षेत्रे कर्षन्ति (घ) क्षेत्रे कर्षणम्

(iv) **पश्चात् व्रजन्ति** सख्याः।

(क) पश्चाति (ख) अनुव्रजन्ति (ग) पश्चात्व्रजन्ति (ग) पश्चव्रजन्ति

DoE, Delhi

**7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- 4x1=4**

(i) मामत्तुं कलहायमानौ चपेटया प्रहरन्ती **दृश्+क्त**

(क) दर्शितवान् (ख) दृष्टम् (ग) दृष्टा

(ii) **अध्यापिका** पाठं पाठयति।

(ख) अध्यापक + डाप् (ग) अध्याप + इका (ग) अध्यापक + टाप्

(iii) ललितलतानां माला **रमणीया।**

(क) रमण + आ (ख) रमणीय + अलम् (ग) रम्+ अनीयर्

(iv) माला **रमणीया**।

(क) रम + णीया (ख) रमणी + या (ग) रमणीय + टाप्

**8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं विकल्पेन पूरयत। 3x1=3**

(i) प्रियंका – रोहित! i)........ किं पठसि?

(क) त्वम् (ख) अहम् (ग) त्वया

(ii) रोहित: - मया संस्कृतस्य पुस्तकम् ii) …….।

(क) पठ्यते (ख) पठामि (ग) पठसि

(iii) प्रियंका – उत्तमम्! तव iii)…….…….. शुद्धं वर्तते।

(क) श्लोकोच्चारण: (ख) श्लोकोच्चारणम् (ग) श्लोकोच्चारण

**9. प्रदत्तेभ्यः रिक्तस्थानेभ्यः समुचितं कालबोधकशब्दं लिखत - 4x1=4**

(i) अहम् प्रातः 5:30……. जागरणम् करोमि।

(क) पादोनपञ्चवादने (ख) सपादपञ्चवादने (ग) सार्धपञ्चवादने

(ii) रमेश: 7:45 ……… अल्पाहारं स्वीकरोति।

(क) सपाद-अष्टवादने (ख) पादोन-अष्टवादने (ग) पादोन-सप्तवादने

(iii) माता 9.15 ………… मन्दिरम् गच्छति।

(क) सार्ध- नववादने (ख) सपाद-नववादने (ग) पादोन-नववादने

(iv) छात्रा: 9:15 ……………… विद्यालयं गच्छति।

(क) पादोननववादने (ख) सार्धनववादने (ग) सपाद नववादने

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - 3x1=3**

(i) ....... अवकाश: भविष्यति।

(ii) त्वम् ........ पठिष्यति?

(iii) ………. त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।

DoE, Delhi

**मञ्जूषा**

| |
|---|
| श्वः, कदा, यदि |

**11. अधोलिखितवाक्येषु रेखाङ्कितपदानि अशुद्धानि सन्ति। शुद्धपदं विकल्पेभ्यः चिनुत- 3x1=3**

(i) अहम् क्रीडाक्षेत्रे <u>**क्रीडति।**</u>

(क) क्रीडसि (ख) क्रीडामः (ग) क्रीडामि

(ii) सिंह: <u>**भयङ्करः**</u> वने निवसति।

(क) भयङ्करे (ख) भयङ्कर: (ग) भयङ्करम्

(iii) <u>**सः**</u> भोजनं कुरु।

(क) राम: (ख) अहम् (ग) त्वम्

**घ–खण्डः**

**पठितावबोधनम्**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपटेया प्रहृत्य जगाद-"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।" इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

**I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 2x½=1**

i.) ग्रामस्य नाम किम् अस्ति?

ii.) बुद्धिमती पुत्रद्वयोपेता कुत्र चलिता?

iii.) राजपुत्रस्य नाम किम् अस्ति?

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2x1=2**

i.) सा पुत्रौ चपेटया प्रहृत्य किम् जगाद?

ii.) राजपुत्रः कुत्र वसति स्म?

iii.) बुद्धिमती कुत्र व्याघ्रं ददर्श?

DoE, Delhi

**III. यथानिर्देशम् उत्तरत -** **2x1=2**

i.) ‘ वसति स्म' इत्यस्याः क्रियायाः कर्तृपदं किम्?

ii.) 'मार्गे गहनकानने' अनयोः पदयोः विशेषणं किम् ?

अथवा

आ निर्देशानुसारम् उत्तरत–

i.) 'वने' इत्यस्य पदस्य कः पर्यायः अत्र आगतः ?

ii.) 'केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पितुर्गृहं प्रति चलिता' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

13. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **5**

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्। शुचि-पर्यावरणम्..
महानगरमध्ये चलदनिशं कालायसचक्रम्।
मनः शोषयत् तनूः पेषयत् भ्रमति सदा वक्रम्।
दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्॥

I. **एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x½=1**

**i.)** जीवितं किम् जातम्?

**ii.)** कालायसचक्रं कुत्र अनिशं चलति?

**iii.)** दुर्दान्तैः दशनैः किं न स्यात्?

**II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्)** **2x1=2**

**i.)** किमर्थं प्रकृतेः शरणं करणीयम्?

**ii.)** महानगरमध्ये अहर्निशं किं चलति?

**iii.)** कालायसचक्रं किं शोषयति?

**III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** **2x1=2**

**i.)** दुर्दान्तैः दशनैः अनयोः पदयोः विशेष्यं किम् ?

**ii.)** 'पवित्रम्' इत्यस्य पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

अथवा

i.) **'कुटिलम्'** इत्यस्य पदस्य कः पर्यायः अत्र आगतः **?**

ii.) **'दुर्वहमत्र जीवितं जातम्'** अत्र किं क्रियापदं प्रयुक्तम्

DoE, Delhi

**14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -** **5**

सिंहासनस्थः रामः। ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ।

विदूषकः – इत इत आर्यौ!

कुशलवौ – (रामम् उपसृत्य प्रणम्य च) अपि कुशलं महाराजस्य?

रामः – युष्मद्दर्शनात् कुशलमिव। भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्शः।

उभौ – राजासनं खल्वेतत्, न युक्तमध्यासितुम्।

रामः – सव्यवधानं न चारित्रलोपाय। तस्मादङ्कव्यवहितमध्यास्यतां सिंहासनम्। (अङ्कमुपवेशयति)

उभौ – (अनिच्छां नाटयतः) राजन्! अलमतिदाक्षिण्येन।

रामः – अलमतिशालीनतया।

**I . एकपदेन उत्तरत (केवलं प्रश्नद्वयम्)** **2x½=1**

i.) रामःकुत्र स्थितः आसीत्?
ii.) कुशलवौ कं प्रणमतः?
iii.) अङ्कव्यवहितं कं अध्यास्यताम् ?

**II. पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** **2x1=2**

i.) विदूषकेनोपदिश्यमानमार्गौ कौ प्रविशतः?
ii.) कुशलवौ रामं प्रणम्य किं पृच्छतः?
iii.) अङ्कमुपविश्य लवकुशौ किं कथयतः?

**III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्)** **2x1=2**

i.) 'ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ' वाक्येऽस्मिन् किं क्रियापदम्?
ii.) ' राजासनं खलु एतत् ' वाक्येऽस्मिन् अव्ययपदं किम् ?
iii.) ' तापसौ कुशलवौ ' अनयोः विशेष्यपदं किम्?

DoE, Delhi

**15. रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्ननिर्माणं कुरुत-** **4x1=4**

**(i)** सव्यवधानं न **चारित्रलोपाय।**

**(ii) आर्यस्य** वन्दनायां लव इत्यात्मानं श्रावयामि।

**(iii) सहस्राधिकेषु** पुत्रेषु सत्स्वपि तव एतादृशं वात्सल्यम्?

**(iv) जम्बुककृतोत्साहात्** व्याघ्रात् कथं मुच्यताम्?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकस्य अन्वयं पूरयत -** **4x1=4**

निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति।

अकारणद्वेषि मनस्तु यस्य वै कथं जनस्तं परितोषयिष्यति।।

अन्वयः - यः निमित्तम् **(i)** ………………. हि प्रकुप्यति, स तस्य **(ii)** ………………. ध्रुवं **(iii)**……………….। यस्य मनः तु वै **(iv)** ………………. जनः तं कथं परितोषयिष्यति।

**मञ्जूषा**

| |
|---|
| अपगमे, अकारणद्वेषि, उद्दिश्य, प्रसीदति |

अथवा

**आ मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत -**

सम्पत्तौ च विपत्तौ च महतामेक रूपता।

उदये सविता रक्तो रक्तश्चास्तमये तथा।।

भावार्थः – संसारे **(i)** ………………. सम्पत्तौ विपत्तौ च **(ii)**……………….भवति। यथा **(iii)** ………………. उदये रक्तो भवति तथा **(iv)** ………………. अपि भवति।

**मञ्जूषा**

| |
|---|
| एकरूपता, सविता, महतां, अस्ते |

DoE, Delhi

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत –** **8 x½ =4**

(i) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता।

(ii) कश्चित् धूर्तः श्गालः हसन् अवदत्।

(iii) त्वं मानुषादपि बिभेषि।

(iv) व्याघ्रः भयाकुलचित्तो नष्टः।

(v) भवान् कुतः भयात् पलायितः?

(vi) अयमेकस्तावद् एव विभज्य भुज्यताम्।

(vii) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः?

(viii) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

**18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसंगानुकूलम् उचितार्थं चिनुत** **3x1 =3**

(i) **दुर्वहम्** अत्र जीवितं जातं प्रकृतिरव शरणम्।

(क) दुष्टम् (ख) दुःखम् (ग) कठिनम्

(ii) प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो माम् **अत्तुम्** कलहायमानौ चपेटया प्रहरन्ती दृष्टा।।

(क) मारयितुम् (ख) भक्षयितुम् (ग) आगन्तुम्

(iii) कृषकः तं वृषभं **तोदनेन** नुद्यमानः अवर्तत।

DoE, Delhi